नवमः पाठः - https://www.youtube.com/watch?v=GlwNbk4kBe4

४२. प्रश्नकरणम् - गङ्गा कुतः प्रवहति?
उत्तरम् - गङ्गा हिमालयतः प्रवहति।

४३. कुतः कुत्र गच्छति भवान्?

४४. अहं ज्ञानार्थं पठामि।
सः पिपासा-निवारणार्थं जलं पिबति।
सा आनन्दार्थं नृत्यं करोति।
अहं शान्त्यर्थं ध्यानं करोमि।

पठनम् -- पठनार्थम्
जलकूपी -- जलकुप्यर्थम्
भोजनम् -- भोजनार्थम्

बालकः पठनार्थं विद्यालयं गच्छति।
छात्रः भोजनार्थं भोजनालयं गच्छति।
जलकूप्यर्थं सः आपणं गच्छति।

४५. प्रश्नकरणस्य अभ्यासः -
उत्तरम् - राधाकृष्णः पठनार्थं विद्यालयं गच्छति।
प्रश्नः - राधाकृष्णः किमर्थं विद्यालयं गच्छति?

४५. अपि / अस्तु /
रामः गच्छति, कृष्णः अपि गच्छति।
मुनिः तपः करोति। देवः प्रत्यक्षः भवति। मुनिः वरं पृच्छति, देवः 'तथा अस्तु (तथास्तु)' इति वदति।

## सुभाषितम्

९. षड् दोषाः पुरुषेणेह, हातव्या भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोध(धः.) आलस्यं दीर्घसूत्रता॥

षड् दोषाः problems पुरुषेण by man इह here, हातव्याः left off 'भूतिम् इच्छता' by the person desirous of wealth
(1) निद्रा over-sleep, (2) तन्द्रा non-attention, (3) भयम्, (4) क्रोधः, (5) आलस्यम् laziness, (6) दीर्घसूत्रता excuses.

कथा -
कश्चन आश्रमः अस्ति। तत्र धौम्यः इति एकः महर्षिः पाठयति। बहवः शिष्याः तत्र पठन्ति स्म। एकदा महती वृष्टिः भवति। महान् जलप्रवाहः भवति। धौम्यः शिष्यम् आह्वयति, वदति - 'शिष्य! कृषिक्षेत्रं सर्वं जलपूर्णम् अस्ति। सर्वत्र प्रवाहः अस्ति। अतः कुत्रापि जलबन्धः नष्टः स्यात्। भवान् कृषिक्षेत्रं गच्छतु, तत् निवारयतु' इति। शिष्यः कृषिक्षेत्रं

गच्छति, सर्वत्र पश्यति। एकत्र जलबन्धः नष्टः अस्ति। तत्र मृत्तिकां स्थापयति। परन्तु जलप्रवाहकारणतः किमपि न तिष्ठति। बहु जलं ततः गच्छति। शिष्यः चिन्तयति - 'किं करोमि इदानीम्?' इति। 'आम् एवं करोमि' इति सः स्वस्य शरीरम् एव तत्र अवरोधरूपेण स्थापयति।
तदनन्तरं गुरुः चिन्तयति - 'शिष्यः न आगतः अस्ति। सः कुत्र अस्ति इदानीम्?' इति। गुरुः कृषिक्षेत्रं गच्छति। तत्र शिष्यं अवरोधरूपेण स्थितं पश्यति। तं दृष्ट्वा आनन्देन शिष्याय ज्ञानं ददाति। तम् आलिङ्गति च। सः गुरोः वचनं सम्यक् पालयति। तस्य नाम एव आरुणिः इति। अपरं नाम तस्य उद्दालकः इति। अहो! शिष्यस्य कर्तव्यपरता!

Say the following in Samskritam aloud (Video9) –

1) గంగ ఎక్కణ్ణుంచి ప్రవహిస్తున్నది? Where is Ganga flowing from?

2) పండు చెట్టునుంచి పడుతున్నది. Fruit is falling from tree.

3) అతను చెన్నై నుంచి కన్యాకుమారికి వెళుతున్నాడు. He is going from Chennai to Kanyakumari.

4) అతను అక్కణ్ణుంచి తిరువనంతపురం వెళుతున్నాడు. He is going from there to Tiruvananthapuram.

5) నేను ఆనందం కోసం ఆడుతున్నాను. I am playing for happiness.

6) నువ్వు (పు) ఎందు కోసం ఆడుతున్నావు? Why are you (male sing) playing?

7) అతను ఎందుకు ఇట్లా (एवम्) చేస్తున్నాడు? Why is he doing like that?

8) నేను నీళ్ళసీసా కోసం దుకాణము (आपणः) నకు వెళుతున్నాను. I am going to shop for a water bottle.

9) సరే. నువ్వు (స్త్రీ) వెళ్ళు. Okay, You (female sing) may go.

10) అతను వెళుతున్నాడు. నువ్వు కూడా వెళ్ళు. He is going. You also go.